ङ्गनिषेधे तु तिलतैलं निषिध्यते"। "अतैलं सार्षपं तैलं यत् तैलं पुष्पवासितम्। अदुष्टं पक्वतैलञ्च स्नानाभ्यङ्गेषु नित्यशः" इति च ति०त० स्मृतिः। "अभ्यङ्गनेपथ्यमलञ्चकार" कुमा०। "अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्रधारणमिति" मनुः। "अभ्यङ्गमाचरेन्नित्यं सजराश्रमवातहम्"। "शिरःश्रवणपादेषु तं विशेषेण शीलयेत्" वैद्य०।

**अभ्यञ्जन** न० अभि+अन्ज–भावे ल्युट्। अभ्यङ्गशब्दार्थे "भोजनाभ्यञ्जनाद्दानात् यदन्यत् कुरुते तिलैः" मनुः। "ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम्। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्" शु०त० प्रचेताः। करणे ल्युट्। २नेत्रादौ कज्जलादिदाने। ३ तत्साधने द्रव्ये। अभि+अन्ज–णिच् ल्युट्। अभ्यञ्जनसाधनव्यापारे "अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च। गुरुपत्न्या न कार्य्याणि" मनुः।

**अभ्यञ्जनीय** त्रि० अभि+अन्ज–कर्म्मणि अनीयर्। १अनुलेप्ये चन्दनादौ २ मर्द्दनीये तैलघृतादौ च "एतदभ्यञ्जनीयं घृतमिति" दुर्गोत्सवपूजापद्धतिः"।

**अभ्यधिक** त्रि०अत्यन्तमधिकः प्रा०स०। उत्कृष्टतमे। "अयं वै नः श्रेष्ठ" इति छ०उ० भाष्ये श्रेष्ठः प्रशस्ततमः अभ्यधिकइति व्याख्यानात् तथात्वम्। "न त्वत्समोऽस्त्यभ्यधिकः कुतोन्यः" गीता। २ अधिकपरिमाणे "धान्यं दशभ्यः कुम्भेभ्योहरतोऽभ्यधिकं वधः" "तथा धरिम (पल) मेयानां शतादभ्याधिके वधः" इति। "पञ्चपलतस्त्वभ्यधिके हस्तच्छेदनमिष्यते" इति च मनुः।

**अभ्यध्व** अव्य० अध्वनोऽभिमुखम् अव्ययी० अच्समा०। मार्गाभिमुखे "संस्थितेऽध्वर्युराहवनीयसमीपे स्थित्वाऽभ्यध्वं गम्यां प्रास्यति" कात्या० २४,५,२५, "अभ्यध्वं मार्गाभिमुखम्" कर्कः। "ययोरभ्यध्वे उत यद्दूरे चित्" "अथ०४,२८,२" तृतीयासप्तम्योर्व्बहुलम्" पा०वा नास्

**अभ्यन्त** पु० स्त्रभि–अन्त–अच् प्र०। तिलकल्के। (खलि)

**अभ्यनुज्ञा** स्त्री० अभि+अनु+ज्ञा–अङ्। अनुज्ञायाम् इदं कुरु इत्यादिना प्रवर्त्तने "कृताभ्यनुज्ञा गुरुणा गरीयसा" कुमा०"ययौ वशिष्ठेन कृताभ्यनुज्ञः" रघुः।

**अभ्यनुज्ञात** त्रि० अभि+अनु+ज्ञा–क्त। इदं कुरु इत्याद्युक्त्वा नियोजिते आभिमुख्येनानुज्ञाते।

**अभ्यनुज्ञान** न० अभि+अनु+ज्ञा–भावे ल्युट्। १ अनुज्ञायाम् इदं कुरु इत्याद्युक्त्वा नियोजनभेदे। "भरद्वाजाभ्युज्ञानाच्चित्रकूटस्य दर्शनम्" रामा०। [२ प्रकाशिते च

**अभ्यनूक्त** त्रि० अभि+अनु+वच–क्त। १ आभिमुख्येन अनूक्ते

**अभ्यन्तर** न० अभिगतमन्तरम्। १ अन्तराले, मध्यस्थाने। "नवोटजाभ्यन्तरसम्भृतानलम्" कुमा०। "प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया"। "शमीमिवाभ्यन्तरलीनपावकाम्" इति च रघुः। "ब्रह्मद्विट्परिविच्छिन्न गणाभ्यन्तर एव च" मनुः। २ उभयोर्मध्ये ३ अन्तःकरणे च। अभ्यन्तरे भवः अण् आभ्यन्तरम्। अन्तःकरणस्थे त्रि० "शौचन्तु द्विविधं प्रोक्तं वाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं वाह्यं भावशुद्धिस्तथान्तरम्। अशौचाद्धि वरं वाह्यं तस्मादाभ्यन्तरं वरम्" दक्षः।

**अभ्यन्तराराम** त्रि०अभ्यन्तरे सर्व्वाभ्यन्तरे परमात्मनि आरमति कर्त्तरि घञ्। आत्मारामे आत्मज्ञे योगिनि "आत्मनश्च "इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः" इति गीतावाक्येन अन्तर्यामिब्राह्मणेन १२० पृष्ठे दर्शितेन च सर्व्वाभ्यन्तरवर्त्तित्वम्।

**अभ्यमन** न० अभितः अमनम् अम–गत्यादौ भावे ल्युट्। १ अभिगमने। चु० अम–ल्युट् अमन्तत्वात् ह्रस्वः। २। रोगे, करणे ल्युट्। ३तत्साधने अहितसेवने च।

**अभ्यमित** त्रि० अभि+चु०+अम–कर्म्मणि क्त। १ रुग्णे २ पीड़िते च। वा नि०। अभ्यान्तोऽप्यत्रैव "बहुभिस्तेन चाभ्यान्तस्तं विव्याध ततोऽधिकैः" भा० द्रो०प०।

**अभ्यमित्र** अव्य० अमित्रस्याभिमुख्यम् अव्ययी०। अमित्रस्य शत्रोराभिमुख्ये। अमित्रमलंगामीत्यर्थे "अलं गामीत्यधिकारे "अभ्यमित्राच्छ च" पा०छ अभ्यमित्रीयः चात् खयतौ अभ्यमित्रीणः अभ्यमित्र्यः। सामर्थ्येन शत्रोरभिमुखगामिनि वीरे पु०। "मारीचोऽनुनयंस्तासादभ्यमित्रीभवामि ते" "उद्योगमभ्यमित्रीणोयथेष्टं त्वञ्च सन्तनु" इति च भट्टिः।

**अभ्यमिन्** त्रि० अभि+चु०+रोगे–अम–कर्त्तरि अमन्तत्वात् ह्रस्वः णिनि। १रोगयुक्ते २आभिमुख्येन पीड़के।

**अभ्यय** पु० अभितः सर्व्वतः अयः निष्क्रमः इण–अच्। १ अस्तमये "आदित्याभ्ययेऽद्भुतायामपि" कात्या० ८, ९,१३ "वपाहोमात् पूर्व्वमादित्यास्तमये" कर्कः। २अपगमे च "तमोऽभ्यये सायं जुहुयात्" कात्या० ४,१५,१२ तमसोऽन्धकारस्याभ्ययेऽपगमे" कर्कः।

**अभ्यर्चन** न० अभि+अर्च–ल्युट्। १ समन्तात्पूजने २ आभिमुख्येन पूजने च। "नित्यं स्नात्वा शुचिः